Review Of Research

ISSN: 2249-894X    Impact Factor : 3.8014(UIF)    Volume - 6 | Issue - 3 | December - 2016

# विदुरनीत्यानुसारं सदाचार-शील-क्षमा-सन्तोषदीनां नैतिक मूल्यानां विवेचनम्

डॉ. सुरेन्द्र पाल वत्स

**नैतिकाचार :**

समाजस्य संगठनेन सह मानवसंस्कृतेः उदभवम् अभवत् । समाजं सुचारूपेण संचलनार्थं एकं प्रति यत्र एतादृशानां नियमानां रचना अभवत्, येषां उल्लंघने आततायिनं दण्डस्य व्यवस्थां अकरोत्। अपरं प्रति व्यक्तिरूपेण आयात्मिक व्यवहारिकश्च सद्व्यवहारः अर्थात् परस्परं कुर्वन्तं व्यवहारं सुगुण-दुर्गुणानां समीपे स्थापयित्वा तस्य मूल्यांकनकर्तुं किञ्चिद् एतादृशान् नियमान् अस्थापयत्, येन मानवस्य व्यक्तित्वं उदतिष्ठत् तथा अन्यं प्रति तान् न स्वीकुर्वन्तं समाजं हेयदृष्ट्या अपश्यत् । एते नियमाः नैतिक तत्वानि अकथयन् यान् स्वीकुर्वति अस्वीकुर्वति वा व्यक्तेः निजविवेकः कार्यं करोति ।

नैतिक शब्देनैव नैतिकतायाः निर्माणम् अभवत् । परस्परं सद्व्यवहारः अन्येषु शब्देषु नैतिकता एवास्ति। आंग्लभाषायाम् अस्य पुरतः




Morality शब्दोऽस्ति। नैतिकतायै 'Ethics' शब्दस्य प्रयोगः अभवत्। यस्य अर्थः Rules of Conduct Science that with moral's विश्वस्य (प्रत्येकस्मिन् धर्मे) प्रतिधर्मे संस्कृतौ च नैतिकाचार संहिता अभवत् । मुख्यरूपेण हिन्दू-नैतिक-संहिता तथा ईसाई-नैतिक-सहिता इत्यादयः सन्ति।

अस्माकं धर्मशास्त्रेषु अपि यमादीनां महाव्रतानां रूपे नैतिकतायाः एव उपदेशो दीयते। नैतिकतत्वं धर्मस्यैव एकम् अङ्.मस्ति ययोः मूलस्वरूपं सर्वदा सदृशम् अभवत् परन्तु तस्य बाह्यरूपे देश-कालानुसारं किञ्चित् परिवर्तनं भवति। काले काले[4] महापुरूषैः नैतिकोपदेशाः अदीयन्त । ईशावास्योपनिषदः प्रथम-मन्त्रे मनुष्याय नैतिकतायाः एव उपादिशत् ।

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्।।[5]

मनु-बृहस्पति-शुक्राचार्य-भर्तृहरि -महात्माविदुर-चाणक्य-ईसादयः महात्मानः निज- युगानुसारं समाजानुसारं च नैतिकोपदेशान् प्रास्तुवन् । तैत्तिरीयोपनिषदः शिक्षावल्लयां अयायस्य एकादश अनुवाके 'सत्यं वद, धर्मं चर'[1] इत्यादिषु वाक्येषु मनुष्यं नैतिकतां प्रति अग्रसर्तुमेव अकथत् ।

महाभारतयुगे महात्माविदुरः विदुरनीतौ येषां नैतिकमूल्यानां प्रतिपादनम् अकरोत् तेषु सदाचार-शील-क्षमा-सत्य-सन्त ोषादीनां संक्षिप्तरूपेण अत्र विवेचनं क्रियते ।

**सदाचारः**

सदाचारशब्दस्य व्युत्पतिः - सद् + अच् प्रत्ययस्य कुर्वति 'सद' भवति। सद > अच्छा, एवं सद+आचार > सदाचारः अर्थात् सुष्ठु आचरणं । सदाचारशब्दस्य उत्पतिः द्विशब्दयोः मेलनेन भवति। सत् शब्दस्य अर्थः सुष्ठु आचारस्य च सामान्यार्थः व्यवहार : अस्ति। जीवने आचरणीयाः ते नियमाः ये चरित्रस्य निर्माणं कुर्वन्ति आचारस्य अन्तर्गता आयान्ति ।[2] श्रुति-स्मृत्यादिषु सदाचारमेव परमोर्धमः इति अकथयत्।[3] सदाचारपालने बलं यच्छन् श्रुति-स्मृतिषु अकथयत् यत् एतेषु ग्रन्थेषु निर्देशितानां कर्माणाम् अनुष्ठाने धर्ममूलक - सदाचारस्य

[1] तै. उ. – 11/1
[2] हरि. पु.पु. – 193
[3] आचारः परमोर्धमः श्रुत्युक्तः स्मार्त एव चं । मनुस्मृति – 1/108
[4] आ.श.को. – 410
[5] ई. उ. – 1

आलस्यरहित: पालनं करोतु।[6] लोकव्यवहारस्य निर्वाहार्थं नियत–सदाचारं नीति: इति कथयति।[7]

मनुस्मृतौ सदाचारस्य महिमा एतेषु शब्देषु प्रतिपादितम् अस्ति। – आचारेण मनुष्य: आयु: लभते, आचारेणैव अभीष्टं सन्ततिं लभते, आचारेणैव अक्षयध्नं लभते आचारेणैव च दोषान् नाशयति।[8]

विदुर: सदाचारस्य विशिष्टापरिभाषां न दत्वा सदाचारस्य महत्वं प्रतिपादितवान् । विदुरानासारं तु सदाचारस्य रक्षा यत्नेन कुर्यात् ध्नं तु आयाति गच्छति च। ध्नस्य क्षीणे सति अपि सदाचारी मनुष्य: क्षीण: न मन्यते परन्तु य: सदाचाराद् अपतत्, तं तु नष्टमेव अवगच्छेत्।[9]

सदाचारं कुलस्य रक्षकरूपे कथयन् विदुर: कथयति यत् सत्येन ध्र्मं रक्षति, योगेन विद्या सुरक्षिताभवति, अमलिनेन सुरूपं रक्षति सदाचरेण च कुलं रक्षति।[10] मनुष्य कुलस्य दृष्ट्या सदाचारं श्रेष्ठ: मन्यते।[11] यस्मिन् कुले सदाचारिण: व्यक्तय: विद्यामाना: भवन्ति, ये सदाचारं न परित्यजन्ति, ते एव कुलश्रेष्ठा: मन्यन्ते ।

येषां सदाचार: शिथिल: न भवति, यै: निजदोषै: पितरौ कष्टं न दीयते, प्रहृष्टमनसा ध्र्मस्य आचरन्ति तथा असत्यं परित्यज्य निजकुलस्य विशेषकीर्तिं इच्छन्ति, तानि महाकुलानि भवन्ति।[12]

विदुर: कथयति यत् सदाचार: नरस्य कुलक्षणानि नाशयति। विनयभावेन अकीर्तिं नाशयति, पराक्रम: अनर्थं दूरीकरोति, क्षमा सदैव क्रोध्ं नाशयति सदाचार: च कुलक्षणस्य नाशं करोति ।[13] य: निजसुखे प्रसन्न: न भवति, अपरस्य दु:खे हर्ष: न मन्यते दानं दत्वा च पश्चातापं न करोति, स: सज्जनेषु सदाचारी अस्ति।

## शील:

शीलशब्दस्य उत्पति: शील् + अच् प्रत्ययेन भवति य: स्वभावरूपे प्रयुक्त: भवति। शील: मानवस्य अतिश्रेष्ठ: नैतिकगुण: अस्ति। अयं गुण: सर्वेषु गुणेषु सर्वोपरि वर्तते। नरस्य सर्वे गुणा: शीले एव समाविष्टा: भवन्ति । शील: मनुष्यस्य इहलौकिक–पारलौकिक उन्नतौ समर्थोऽस्ति। सर्वेषु शास्त्रेषु शीलस्य महत्तां स्वयकरोत्।

मृच्छकटिकनाटके संसारे शीलमेव एकमात्रं सारतत्वं मन्यते। कुलस्य प्रशंसया किम्? शीलमेव अस्मिन् लोके एकमात्रं सारम् अस्ति। सुक्षेत्रे वपति तु कण्टकयुक्ता: वृक्षा: अपि सुप्रकारेण फलन्ति।[14]

महाभारतस्य शान्तिपर्वे शीलस्य महत्त्वं प्रकाशयन् अकथयत् यत् शीलेनैव त्रयलोकान् जेतुं शक्यते। अस्मिन् काऽपि शंका नास्ति। शीलपुरूषेभ्य: अस्मिन् लोके किञ्चित् अपि असुायं नास्ति।[15]

---

[6] श्रुति–स्मृत्युदितं सम्यड्. निब( स्वेषु कर्मसु।
धर्ममूलं निषेवेत सदाचारमतन्द्रितः ।। मनुस्मृति – 4/155

[7] सत्येन रक्ष्यते धर्मो विद्यायोगेन रक्ष्यते ।
मृजया रक्ष्यते रूपं कुलं वृतेन रक्ष्यते ।। वि.नी. 2/39

[8] आचारल्लभते ह्यायुराचारादीप्सिताः प्रजाः।
आचार(नमक्षयमाचारो हन्त्यलक्षणं ।। मनुस्मृति – 4/156

[9] वृतं यत्नेन संरक्षेद वितमेति याति च ।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः । वि.नी. 4/30

[10] सत्येन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते।
मृजया रक्ष्यते रूपं कुलं वृत्तेन रक्ष्यते ।। वि.नी. 2/39

[11] न कुलं वृत्तहीनस्य प्रमाणमिति मे मतिः ।
अन्तेष्वपि हि जातानां वृत्तमेव विशिष्यते ।। वि.नी. अ. 2 श्लोक 41

[12] येषां हि वृतं व्यथते न योनिश्चित्प्रसादेन चरन्ति धर्मम् ।
ये कीर्तिमिच्छन्ति कुले विशिष्टां व्यक्तानृतास्तानि महाकुलानि ।। वि.नी श्लो. 24

[13] अकीर्तिं विनयो हन्ति हन्त्यनर्थं पराक्रमः ।
हन्ति नित्यं क्षमा क्रोध्माचारो हन्त्यलक्षणम् ।। वि.नी., अ.7 श्लोक 42

[14] किं कुलेनोपदिष्टेन शीलमेवात्रा कारणम् ।
भवन्ति सुतरा स्पफीतः सुक्षेत्रो कण्टकि द्रुमाः ।। मृच्छ 8/29

[15] शीलेन हि त्रायोलोकाः शक्याजेतुं न संशयः ।
न हि किञ्चदसाध्यं वै लोके शीलवतां भवेत् ।। महा.शा.प. 124/15

विदुरः कथयति यत् नरे शीलस्य एव प्रधनता अस्ति। यः नरः शीलरहितः अस्ति तस्य जीवने ध्नेन च भ्रातृभिः अपि को लाभः न वर्तते। नरे शीलस्यैव प्रधनता भवति, यस्य नरस्य जगति शीलः नश्यति तस्य न जीवनेन, न ध्नेन भातृभिः न च किमपि प्रयोजनमस्ति।[16] विदुरः कथयति यत् शीलवान् नरः सर्वेषु विजयते, सुवस्त्रधरिणः सभां विजयन्ते, यस्य पार्श्वे गावः सन्ति, सः मधुरस्वादस्य आकांक्षां जयति, यानेन गमनमार्गं जयति शीलवान् च नरः सर्वान् विजयते।[17]

**क्षमा**

क्षमायाः व्युत्पतिः – क्षमा शब्दः क्षम् + अड्. + टाप् प्रत्ययेन भवति।[18] क्षमया अभिप्रायः निजेन लघुः तथा दुर्बलनरेण निजं प्रति किमपि अपराधं कुर्वति अपि तं सहमानः चितस्य विक्षेपितं न क्षमा नाम महान् ध्र्मः अस्ति।[19]

क्षमायाः अर्थः – चित्तस्य एकवृत्तिः अन्येन प्रयच्छन् कष्टानि तूष्णीं भूत्वा सहनं सहनशीलता, ध्ैर्यं तथा क्षमा।[20] भगवान् स्वयमपि क्षमायाः साक्षात् प्रतिमा अस्ति यः तं पादघातकं भृगुम् अक्षमत। अतः क्षमायाः महिमा सर्वविदिता अस्ति। क्षमायाः ध्र्मशास्त्रेषु महती प्रशंसा कृता अस्ति। मनुना कथितं यत् ध्र्मस्य दशलक्षणेषु क्षमायाः द्वितीयस्थानं वर्तते।[21] गीतायाः षोड्श अयाये स्वयं भगवान् श्रीकृष्णः क्षमां दैवी सम्पदां प्राप्तनरस्य लक्षणं अकथयत्।[22]

क्षमा ब्रह्मैवास्ति, क्षमा सत्यमस्ति, क्षमैव भूतं – भावि चास्ति। क्षमा तपोऽस्ति, क्षमा शुचितास्ति, क्षमया एव इदं जगत् धरितम्। हरिवंशपुराणे क्षमा सर्वदोषहरणा कथिता।[23] क्षमया मनुष्ये गुणानां बाहुल्यं भवति।[24] क्षमां बलवतां पुरूषाणां शक्तिः कथयन् विदुरः कथयति दुष्ट–पुरूषाणां शक्तिः अस्ति हिंसा, नृपाणां बलमस्ति दण्डं, स्त्रीणां बलं सेवा, गुणवतां च बलमस्ति क्षमा, तपस्विनां बलमस्ति तपः, वेदज्ञानां शक्तिः अस्ति वेदः, ये असुावः सन्ति तेषां बलं हिंसा गुणवतां च पुरूषाणां बलमस्ति क्षमा।[25] विदुरः ध्ृतराष्ट्रं बोध्यति यत् क्षमा नराय परम हितकारी अस्ति। अतः समर्थासमर्थयोः द्वयोः प्रकारयोः मनुष्याः क्षमाशीलाः भवेयुः यतः संसारे ऐश्वर्यसम्पन्नस्य एकमात्रम् उपाये अयमेवास्ति। । विदुरः ध्ृतराष्ट्रं क्षमाशीलभवतः प्रेरणां यच्छन् कथयति यत् यस्य मनुष्यस्य हस्ते क्षमारूपी खड्गः अस्तु, दुष्टपुरूषाः अपि तस्य किञ्चित् अनिष्टं न कर्तुं शकनुवन्ति। अस्मिन् जगति क्षमा वशीकरणं रूपमस्ति। प्रायः एतादृशं किमपि कार्यं नास्ति यत् क्षमया न सिद्धयति। यस्य हस्ते शान्तिरूपी खड्गः अस्ति, तस्य दुष्टपुरूषाः अपि किं करिष्यन्ति ?[26]

क्षमां आयुवर्ध्कगुणानां रूपे उल्लेखं कुर्वन् विदुरः कथियति यत् सर्वान् जीवान् प्रति कोमतलायाः भावः गुणेषु अदोषदृष्टं, क्षमा, ध्ृतिः मित्राणां च अपमानं न करणं एते सर्वे गुणाः आयुः वर्ध्यन्ति इति विद्वज्जनाः कथयन्ति?[27] क्षमा सदैव क्रोधं नाशयति सदाचारः च कुलक्षणस्य नाशं करोति । महाभारतस्य अनुशासनपर्वे अहिंसायाः विषये अकथयत् – 'अहिंसा परमोध्र्मः, अहिंसा परं तपः अहिंसैव च परमं सत्यम् अस्ति, यया ध्र्मः प्रवतते।[28] वनपर्वे अहिंसा परमोध्र्मः इति अकथयत्।[29] हरिवंशपुराणे मनवचन – कर्मभिः कमपि जीवं कष्टं न दानं अहिंसा वर्तते।[30] विदुरानुसारं अहिंसा सुखदायिनी वर्तते – एकमात्रं अहिंसा एव सुखं यच्छति।[31]

---

[16] शीलं प्रधानं पुरुषे तद् यस्येह प्रणश्यति ।
न तस्य जीवितेनाथो न ध्नेन न बन्धुभिः ।। वि.नी. अ.–2, श्लोक 48

[17] जिता सभा वस्त्रावता मिष्टाशा गोमता जिता ।
अध्वा जितो मानवता सर्व शीलवता जितम् ।। वि.नी. अ.2, श्लोक 47

[18] मानक हिन्दी कोश खण्ड – 1

[19] हरिवंश पुराण में ध्र्म, पृ.7

[20] मानक हिन्दी कोश खण्ड – 1

[21] मनुस्मृति – 6/92

[22] गीता – 16/3

[23] क्षमा ब्रह्म क्षमासत्यं क्षमाभूतं च भावि च ।
क्षमातपः क्षमाशौचं क्षमयेद ध्ृतं जगत् ।। महा व.प.–29/374

[24] क्षान्तेषु गुणबाहुल्यं दोषाहरणम् क्षमा। हरि. पु. 2/51/38

[25] हिंसा बलमसाधूनां राज्ञं दण्डविर्ध्लिम्।
शुश्रूषा तु बलं स्त्रीणां क्षमा गुणवतां बलम् ।। वि.नी. 2/75

[26] क्षमावशीकृतिर्लोके क्षमया न साध्यते ।
शान्ति खड्गः करे यस्य किं करिष्यति दुर्जनः ।। वि.नी. – 1/55

[27] मार्दवं सर्वभूतानामनसूया क्षमा ध्ृतिः । आयुष्याणि बुधः प्राहुर्मित्राणां चाविमानना । वि.नी. – 7/52

[28] अहिंसा परमो ध्र्मस्तया हिंसा परं तपः । अहिंसा परमं सत्यं यतो ध्र्मः प्रवर्तते । महा. अनु. प. – 115/25

[29] वनपर्व – 207/74

**सन्तोष :**

सन्तोषशब्दः सम् उपसर्गपूर्वकं तुष् धतुना अजायत। मानक हिन्दी कोषानुसारं सन्तोषशब्दस्य निम्नलिखिताः अर्थाः सन्ति-तृप्तिः, सुखं, हर्षः, शान्तिः, सन्तुष्टिः, प्रत्यवस्थायां प्रसन्नं।[32] संसारे सन्तोषेण अतिरिच्य किञ्चिदपि नास्ति। सन्तोषः परमं सुखं अस्ति। कथितमपि – 'सन्तोषी सर्वदा सुखी, असन्तोषी सर्वदा दुःखी।'

बुद्धचरिते कथितम् – 'यदि त्वं पूर्णसुखं कामयसे तु सन्तोषस्य आश्रयं कुरू। सन्तुष्टः नरः भूमौ सुखपूर्वकं शेते असन्तुष्टः व्यक्तिः च स्वर्गेऽपि सुखं न लभते।'[33]

महाभारते कथितं यत् सन्तोषः स्वर्गादपि अतिरिच्यते। सन्तोषः परमं सुखम् । सम्यक् प्रतिष्ठितया सन्तुष्ट्या अतिरिच्यः किञ्चिदपि नास्ति। पञ्चतन्त्रे कथितं यत् सन्तोषरूपी पोयूषेण तृप्तमनुष्याय सुखं शान्तिश्चैवास्तः।[34] पञ्चतन्त्रे कथितं यत् संतोषरूपी पीयूषेण तृप्तः शान्तचित नरैः यत् सुखं प्राप्यते सः ध्न-लोभात् इतस्ततः धवतः कुतः अर्हति।[35] ध्नसम्पन्ने सति यः असन्तुष्टः भवति सः दरिद्रोऽस्ति।[36] महाभारतस्य वनपर्वे अकथयत् यत् पिपासायाः कोऽपि अन्तः नास्ति। सन्तोषैव परमं सुखमस्ति। अतः पण्डितजनाः सन्तोषमेव अस्मिन् लोके सर्वश्रेष्ठः मयन्ते।[37] बुद्धचरिते कथितं – 'यदि त्वं पूर्णसुखं कामयसे तु सन्तोषस्य आश्रयं कुरू। सन्तुष्टः नरः भूमौ सुखपुर्वकं शेते असन्तुष्टश्च नरः स्वर्गेऽपि सुखं न लभते।[38] विदुरः धृतराष्ट्रं धर्मस्य न त्यागं एवं सन्तोषधरणं प्रेरयन् कथयति यत् – ध्र्मः नित्योऽस्ति, किन्तु सुखः दुखं चतु अनित्यमस्ति, जीव-नित्योऽस्ति परं अस्य कारणं ।

---

[30] हरि. पु. – पृ. 211
[31] वि.नी. – 1/57
[32] मानक हिन्दी कोष खण्ड – 5
[33] सुखमिच्छसि पूर्ण चेत्सन्तोषमवलम्बताम्। भूमावपि सुखं शेते तुष्टो नान्यस्त्रिाविष्टपे ।। बुद्वचरित – 26/59
[34] सन्तोषामृततृप्तानां सुखं शान्तिरेव च। चाण. 7/3
[35] सतोषामृतप्तनां यत्सुखं शान्तिचेतसाम् ।
कुतस्त(नलुब्धनामितश्चेतश्च धवताम् । प× च मित्रा सम. 157
[36] प्रभूति{पि ध्ने{तुष्टो दरिद्रः सो{स्ति शाश्वतम् ।। बु( च. 26/60
[37] अन्तोनास्ति पिपासायाः सन्तोषः परमं सुखं ।
तस्मात् सन्तोषमेवेह परं पश्यन्ति पण्डिताः ।। महा. . प. 2/46
[38] सुखमिच्छसि पूर्ण चेत्सन्तोषमवलम्बताम् ।
भूागि सुखं शेते तुष्टो नानस्त्रिा विष्टपे ।। बु( च. 26/59